अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ........................

**Paper Code**
**BV-204**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2018**
**बी. ए. व्याकरणम् (सत्रम् : द्वितीयम्)**
**संस्कृतम्**
**चतुर्थपत्रम्–वैदिकसिद्धान्तपरिचयः**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 75**

**अवधेयम् :** इदं प्रश्नपत्रं पञ्चसप्ततेः (७५) अङ्कानां विद्यते। अत्र खण्डचतुष्टयं वर्त्तते। प्रत्येकं खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

## खण्डः – "अ"

**(वेद)** **20 अङ्काः**

**प्रश्नः1– (क) वागाम्भृणीनासदीयश्रद्धासूक्तानां केचन पञ्च मन्त्राः लेखनीयाः** **(1X5=05)**

**(ख) निम्नलिखितेषु चतुर्णां मन्त्राणां शब्दार्थपुरस्सरं स्वशब्दैरर्थं बोधयन्तु।** **(2.5X4=10)**

i. अहं सोममाहनसं विभर्म्यहं त्वष्टारमुत पूषणं भगम्।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये३ यजमानाय सुन्वते।।

ii. को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः।
अर्वाग्देवा अस्य विसर्जननाथा को वेद यत आबभूव।।

iii. श्रद्धां प्रातर्हवामहे श्रद्धां मध्यंदिनं परि।
श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः।।

iv. अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूयावेशयन्तीम्।।

v. कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा।।

**(ग) अधोलिखितानां मन्त्राणाम् ऋषिदेवताछान्दांसि ज्ञापनीयानि।** **(1X5=05)**

i. अहं सोममाहनसं ...........................................।
ii. कामस्तदग्रे ...................................................।
iii. तिरश्चीनो विततो ...........................................।
iv. श्रद्धां देवा यजमाना .......................................।
v. श्रद्धां प्रातर्हवामहे ..........................................।

## खण्डः "ब"

**(दर्शनम्)** **15 अङ्काः**

**प्रश्नः2– (क) द्वयोः सूत्रयोर् अग्रे पञ्च–पञ्च सूत्राणि लेखनीयानि।** **(2.5X2=05)**

i. त्रयमन्तरङ्गं पूर्वेभ्यः। ii. मैत्र्यादिषु बलानि। iii.तत्र ध्यानजमनाशयम्। iv.हानमेषा क्लेशवदुक्तम्।

**(ख) अधोलिखितानां सूत्राणामर्थं बोधयन्तु।** (1X1=05)

i. स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात्।
ii. सत्वपुरुषयोः शुद्धिसाम्ये कैवल्यम्इति।
iii. सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात्।
iv. विशेषदर्शिनः आत्मभावभावनाविनिवृत्तिः।
v. तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः।

**(ग) निम्नोक्तेषु द्वौ प्रश्नौ समाधेयौ –** (2.5X2=05)

i. कर्माणि कतिप्रकाराणि सन्ति? कानि च तानि?
ii. भूतजयः कथं भवति? ततश्च किं भवति?
iii. पुरुषज्ञानं कथं भवति? ततश्च किं भवति?
iv. विवेकजं ज्ञानं किम् अस्ति? केन च प्राप्यते?

## खण्डः "स"
## (उपनिषद्) 20 अङ्का

**प्रश्नः3– (क) कठोपनिषत्तः स्मृताः केचन पञ्च मन्त्राः लेखनीयाः।** (1X5=05)

**(ख) द्वयोः भावार्थः लेखनीयः –** (2.5X2=05)

i. श्वोभावा मर्त्यस्य यदन्तकैतत्
सर्वेन्द्रियाणां जरयन्ति तेजः।
अपि सर्वं जीवितमल्पमेव
तवैववाहास्तवनृत्यगीते।।

ii. मनसैवेदमाप्तव्यं नेह नानास्ति किंचन।
मृत्योः स मृत्युं गच्छति य इह नानेव पश्यति।।

iii. नाविरतो दुश्चरितान् नाशान्तो नासमाहितः।
नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्।।

**(ग) चत्वारः प्रश्नाः समाधेयाः।** (2.5X4=10)

i. विज्ञानवतः का स्थितिर् भवति? मन्त्रद्वयं वर्णयन्तु।
ii. केषां सुखं च शान्तिश्च शाश्वती? मन्त्रद्वयं वर्णयन्तु।
iii. ओम् इत्येतस्य पदस्य महिमानं मन्त्रत्रयेण वर्णयन्तु।
iv. नचिकेतसः प्रथमं द्वितीयञ्च वरं किमस्ति मन्त्रेण वर्णयन्तु।
v. शरीरस्य रथोदाहरणं मन्त्रद्वयेण वर्णयन्तु।

## खण्डः "द"
## (गीता, अध्याय–12,18) 20 अङ्का

**प्रश्नः4– (क) स्वस्मृत्या केचन पञ्च श्लोकाः लेखनीयाः।** (1X5=05)

**(ख) प्रसङ्गपुरस्सरं द्वयोः श्लोकयोः व्याख्या कर्तव्या।** (5X2=10)

i. कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन।
सङ्गं त्यक्त्वा फलं चैव सत्यागः सात्त्विको मतः।।

ii. अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि।।

iii. अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी।।

**(ग) द्वयोः श्लोकयोः समासविभक्तिवचनानि ज्ञापयन्तु।** **(**2.5X2=05**)**

i. मुक्तसङ्गोऽनहंवादी धृत्युसाहसमन्वितः।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते।।

ii. यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।

iii. क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिर् अवाप्यते।।

**---------------x---------------**